स तस्याः प्रियकार्य्येण सन्तुष्टो द्विजसत्तमः।
हिंसाद्रोहविमुक्तश्च बलिहोमपरायणः।
शान्तो दान्तः क्षमायुक्तः सदा मधुरभाषितः॥
सर्व्वप्राणिहितार्थी च लोभमोहविवर्ज्जितः।
जितेन्द्रियो जितक्रोधो वृद्धोऽसौ ब्राह्मणोत्तमः॥
राजपत्न्याः सुसेवाभिः प्रीतोऽसौ द्विजसत्तमः।
प्रत्युवाच स तां प्रीत्या शचि! त्वं चातिदुर्लभे।
किं वा त्वदीप्सितं देवि! सत्येन वद पण्डिते"॥

शच्युवाच।

"पापं यज्ज्ञानतो भर्त्रा समस्तं कर्म्मणा कृतम्।
तत् क्षमस्व महाभाग! रक्षस्व सुरपालकम्।
वासवस्तव शापेन मार्ज्जारत्वमुपागतः।
इन्द्रो व्याधगृहे देव! विद्यते हि न संशयः।
पुरन्दरस्य शापान्तः केनोपायेन सिध्यति"॥

ब्राह्मण उवाच।

"शचि! त्वं पतिभक्तासि मद्वाक्यमवधारय।
पतिव्रते! महाभागे! कालिकाव्रतमाचर॥
दारुणं यत् कृतं तेन व्रतेनैव विमुच्यते।
कोपात् शापो मया दत्तो तन्मोक्षं कुरु सुव्रते!"॥

शच्युवाच।

"विधानं ब्रूहि मे ब्रह्मन् कालिकाया व्रतस्य च।
तदा तव प्रसादेन करोमि तद्व्रतं द्विज!"॥

ब्राह्मण उवाच।

"अश्वत्थतरुमूलेऽस्ति वटको नाम हिंसकः।
तस्यैव भवनं गच्छ शापान्मोक्षं च कारय॥
पत्नी सुभद्रा तस्यास्ति पतिशुश्रूषणे रता।
तस्याः कुलव्रतं कर्म्म तत्परा भव शोभने।
ततश्च प्राङ्मुखीभूय गता सा तस्य मन्दिरम्॥
दृष्ट्वा व्याधः शचीं देवीं प्रत्युवाच सुभद्रिकाम्।
आयान्तीयं शची देवी तस्याः सम्भाषणं कुरु॥
इति तस्य वचः श्रुत्वा सुभद्रा हृष्टमानसा।
तस्याः सम्भाषणार्थन्तु सुभद्रा चागता बहिः।
ताञ्च दृष्ट्वा शचीं देवीं सार्घ्यपाद्यादिकं ददौ॥
शचि! त्वं राजभार्य्यासि कस्मादागमनं तव।
किं कार्य्यं कथय त्वं हि इत्युवाच शचीं प्रति॥
प्रत्युवाच शची तान्तु भर्त्ता मे सुरपालकः।
स च ब्राह्मणशापेन मार्ज्जारश्चाभवद्द्रुतम्॥
क्व गतः प्राणनाथोऽसाविति चिन्तापरानिशम्।
ज्ञात्वा केनाप्युपायेन प्राप्ता च भवतीगृहम्॥
इत्युक्ता राजपत्न्या च दृष्टो मार्ज्जारकस्तदा।
सा ज्ञात्वा तं प्रियं शक्रं चिन्तां प्राप्ता दुरत्ययाम्॥
दृष्ट्वा मार्ज्जारतां प्राप्तं विललापाकुलेन्द्रिया।
विलपन्तीं शचीं दृष्ट्वा सुभद्रा प्रत्युवाच ताम्॥
पतिव्रते महाभागे! त्वमेव राजगेहिनी।
त्वं दुःखेन विलिप्तासि सन्देहो नास्ति तत्र वै॥
किन्तु तस्याप्युपायोऽस्ति कालिकाव्रतमाचर।
अतिप्रत्यक्षरूपा सा अस्माकं कुलदेवता॥
कालिका सा महादेवी शुभसन्ततिदायिनी।
व्रतस्यास्य प्रभावेण साकल्यमुपजायते"॥

शच्युवाच।

"विधानं चास्य मे ब्रूहि कालिकाया व्रतस्य च।
ममोपदिश्यतामेव तद्व्रतञ्च करोम्यहम्॥
शुद्धकाले समारभ्य कृष्णपक्षे चतुर्द्दशीम्॥
सङ्कल्प्य विधिना पूर्व्वममावास्यां व्रतं चरेत्।
समारभ्य गुणैकेन द्विगुणं परिशोधयेत्॥
न रात्रौ भोजनं कार्य्यं वामहस्ते भुजिक्रिया।
सिद्धमन्नं रात्रिकाले दग्धमीनञ्च सर्व्वदा॥
वर्ज्जयेत् पिष्टकं किञ्चित् रक्तशाकस्य चाम्लकम्।
द्विषट्कां विप्रजायाञ्च सधवां भोजयेत्ततः॥
एवं क्रमेण कृत्वा तु कतिकालं नयेद्व्रतम्।
ततः शुद्धदिने प्राप्ते भौमाहे मन्दवासरे॥
यथाशक्त्युपचारैश्च पूजां कुर्य्याद्विधानतः।
तथापराह्णकाले तु सन्ध्योपसमये तथा॥
रात्रौ तु कदलीकाण्डे गृहं निर्म्माय प्राङ्गणे।
तस्य मध्ये समारोप्य कालिकां पूजयेत् सदा॥
पाद्यार्घ्याचमनीयैश्च गन्धपुष्पादिभिस्तथा।
धूपैर्दिव्यप्रदीपैश्च नैवेद्यैर्विविधैस्तथा॥
पिष्टकं चैव सिद्धान्नं व्यञ्जनं दग्धमीनकम्।
निवेद्य सकलं देव्यै बलिं दत्त्वा प्रणम्य च॥
तदन्नं व्यञ्जनं सर्व्वं नैवेद्यादिबलिं तथा।
महारण्ये प्रदातव्यं कृत्वैतत् व्रतमुत्तमम्॥
वैशाखे कदलीमूले या कुर्य्यात् कालिकाव्रतम्।
कार्य्यसिद्धिर्भवेत् तस्या भविता गतिरुत्तमा॥
एतद्व्रतविधानन्तु कृत्वा सिद्धिर्भविष्यति।
एतद्व्रतमिदं भद्रे कुरु गत्वा निजालयम्॥
तस्यास्तद्वचनं श्रुत्वा सा शची हर्षमानसा।
गृहमागत्य सा तस्या वार्षिकं व्रतमाचरत्॥
गन्धपुष्पैर्धूपदीपैर्नैवेद्यैरुत्तमैस्तथा।
कृत्वा चाश्ममयीं देवीं पूजयेत् भक्तिसंयुता॥
नानासुगन्धिपुष्पाणि दिव्यरत्नाद्यलङ्कृतम्।
सिद्धान्नं पायसञ्चैव शर्करान्वितपिष्टकम्॥
अमृतायतद्द्रावञ्च दीयते च प्रयत्नतः।
लुलापच्छागमेषादिबलिं दत्त्वा प्रभूतकम्॥
नानावाद्योद्यमैर्गीतैः प्रणिपत्य पुनः पुनः।
कृताञ्जलिपुटा स्तोत्रं भक्तिनम्रा चकार सा॥
तुष्टा प्राह महाकाली वरं वृणु शुभानने!।
तत् श्रुत्वा राजपत्नी सा बभाषे च मुदान्विता॥
मत्प्रभुराखुभुक् भूतस्तन्मोक्षं कुरु चेश्वरि!।
वरं दत्त्वा हैमवती बभूवान्तर्हिता नृप!॥
द्वादशाब्दाच्च तत्शापान्मोचितो वत्सरे तदा।
मार्ज्जाररूपं सन्त्यज्य स गतोऽन्तेऽमरावतीम्॥
पुष्पवृष्टिश्च दुन्दुभ्या वाद्यं देवगणैः कृतम्।
कालिकायाः प्रसादेन गतः शक्रो निजालयम्॥
अनेनैव विधानेन या कुर्य्यात् कालिकाव्रतम्।
सत्वरं कार्य्यसिद्धिः स्यात्तस्या अत्र न संशयः"॥
इति भविष्यपुराणे कालिकाव्रतकथा समाप्ता॥

कालिङ्गं, क्ली, (केन जलेन आलिङ्ग्यतेऽसौ। आ+लिगि+कर्म्मणि घञ्।) फलविशेषः। तरमुज् इति ख्यातम्। तत्पर्य्यायः। कालिन्दकम् २ कृष्णवीजम् ३ फलवर्त्तुलम् ४। अस्य गुणाः। शीतलत्वम्। ग्राहित्वम्। स्वादुपाकरसत्वम्। गुरुत्वम्। विष्टम्भित्वम्। स्यन्दित्वम्। दृक्शुक्रपित्तनाशित्वम्। कफवातकारित्वञ्च। पक्वस्य तस्य गुणाः। पित्तवृद्धिकारित्वम्। उष्णत्वम्। क्षारत्वम्। कफवातनाशित्वञ्च। तत्पत्रगुणौ। रुधिरस्थापनत्वम्। तिक्तत्वञ्च। इति पथ्यापथ्यविवेकः॥

कालिङ्गः, पुं, (केन जलेनालिङ्ग्यते इति। क+आ लिगि+कर्म्मणि घञ्।) भूमिकर्कारुः। (कं जलमालिङ्गति। आ+लिगि+कर्म्मण्यण्।) हस्ती। (कं वातं आलिङ्गति गृह्णाति अश्नाति इत्यर्थः।) सर्पः। इति मेदिनी॥ (कुत्सितं लिङ्गं अङ्कादिचिह्नं यस्येति कोः कादेशः।) लौहभेदः। अस्य लक्षणम्। "कालिङ्गो लिङ्गवान् यः स्याद्घनः सूक्ष्माङ्कको मतः"। इति सुखबोधः॥ (कलिङ्गे भवः। अण्। कलिङ्गदेशोद्भवः। यथा महाभारते ८। कर्णशल्यसंवादे ४५। १४।

"कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः।
कोमलाःकाशयोऽङ्गाश्च कालिङ्गा मागधास्तथा"॥

कलिङ्गदेशस्य राजा। अण्। कलिङ्गराजः। यथा रघुः ४। ४०।

"प्रतिजग्राह कालिङ्गः तमस्त्रैर्गजसाधनः।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्व्वतः"॥)

कालिङ्गिका, स्त्री, (कालिङ्ग+गौरादित्वात् ङीष्। स्वार्थे संज्ञायां वा कन् टाप् ह्रस्वश्च।) त्रिवृत्। इति राजनिर्घण्टः॥

कालिङ्गी, स्त्री, (कालिङ्ग+गौरादित्वात् ङीष्।) राजकर्कटी। इति मेदिनी॥ (कालिङ्गदेशोद्भवा। यथा महाभारते १। ९५। २२।

"अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे"॥)

कालिदासः, पुं, (काल्याः दासः। संज्ञायां ह्रस्वः।) सुगमख्यातकविः। तत्पर्य्यायः। रघुकारः २ मेधारुद्रः ३ कोटिजित् ४। इति त्रिकाण्डशेषः॥ स तु रघुकुमारसम्भवश्रुतबोधमेघदूताभिज्ञानशकुन्तलनलोदयशृङ्गारतिलकादिग्रन्थकर्त्ता विक्रमादित्यराजसभास्थनवरत्नमध्ये सप्तमरत्नञ्च॥ (यदुक्तम्।

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य"॥)

कालिदासकः, पुं, (कालिदास+स्वार्थे कन्।) कालिदासः। इति शब्दरत्नावली॥

कालिनी, स्त्री, (कालः शिवः अधिष्ठातृतया यद्वा कालः पुरुषाकारः आकाशस्थो लुब्धकः सन्निकृष्टत्वेन अस्त्यस्याः।) आर्द्रानक्षत्रम्। इतिहेमचन्द्रः॥

कालिन्दकं, क्ली, (कालिं जलराशिं ददातीति। दा+कः। स्वार्थे कन्।) कालिङ्गम्। इति राजनिर्घण्टः॥

कालिन्दी, स्त्री, (कलिन्दाख्यपर्व्वते तत्सन्निहितदेशे वा जाता। कलिन्दात् निःसृता वा "तत्र भवः"। ४।३।५३। इति अण् ततो ङीप्।) यमुना नदी। इत्यमरः। १।१०।३२॥ (यथा रघुः १५। २८।

"उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः।
निर्म्ममे निर्म्ममोऽर्थेषु मथुरां मधुराकृतिः"॥)

रक्तत्रिवृत्। इति राजनिर्घण्टः॥

कालिन्दीकर्षणः, पुं, (कालिन्दीं कर्षति यः। कृष्+कर्त्तरि ल्युः। कालिन्द्याः कर्षणो वा।) बलदेवः। इति हलायुधः॥